# ॥ आनन्दभैरवोक्तं श्रीरेणुकाहृदयम् ॥

.. AnandabhairavoktaM shrIreNukAhRidayam ..

sanskritdocuments.org

August 20, 2017

# .. AnandabhairavoktaM shrIreNukAhRidayam ..

# ॥ आनन्दभैरवोक्तं श्रीरेणुकाहृदयम् ॥

## Sanskrit Document Information

Text title : reNukAhridayam Anandabhairavokta

File name : reNukAhridayam.itx

Category : hRidaya, devii, reNukA

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : DPD

Proofread by : DPD

Latest update : April 5, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ आनन्दभैरवोक्तं श्रीरेणुकाहृदयम् ॥

॥ श्री गणेशाय नमः । श्री रेणुकायै नमः ॥

स्कन्द उवाच -
भगवन् देवदेवेश परमेश शिवापते ।
रेणुकाहृदयं गुह्यं कथयस्व प्रसादतः ॥ १॥

शिव उवाच -
शृणु षण्मुख वक्ष्यामि रेणुकहृदयं परम्।
जपेद्यो हृदयं नित्यं तस्य सिद्धिः पदे पदे ॥ २॥

रेणुकाहृदयस्यास्य ऋषिरानन्दभैरवः।
छन्दोभृद्विराट् प्रोक्तं देवता रेणुका परा ॥ ३॥

क्लीं बीजं कामदा शक्तिर्महामायेति कीलकम् ।
सर्वाभीष्ट फलप्राप्त्यै विनियोग उदाहृतः ॥४॥

ॐ क्लीमित्यङ्गुष्ठादि हृदयादिन्यासं कृत्वा ध्यातेन्नित्यमिति ध्यात्वा
हृदयं पठेत् ।

॥ अथ ध्यानम् ॥

ध्यायेन्नित्यमपूर्ववेशललितां कन्दर्पलावण्यदां
देवीं देवगणैरुपास्यचरणां कारुण्यरत्नाकराम् ।
लीलाविग्रहणीं विराजितभुजां सच्चन्द्रहासदिभि-
र्भक्तानन्दविधायिनीं प्रमुदितां नित्योत्सवां रेणुकाम् ॥

आनन्दभैरव उवाच -
ॐ नमो रेणुकायै सर्वभूतिदायै सर्वकर्त्र्यै सर्वहर्त्र्यै सर्वपालिन्यै
सर्वर्थदात्र्यै सच्चिदानन्दरूपिण्यै एकलायै कामाक्ष्यै कामदायिन्यै
भर्गायै भर्गरूपिण्यै भगवत्यै सर्वेश्वर्यै एकवीरायै वीरवन्दिताअयै
वीरशक्त्यै वीरमोहिन्यै वीरसुवेश्यै ह्रींकारायै क्लींकारायै वाग्भवायै
ऐंकारायै ॐकारायै श्रींकारायै दशार्णायै द्वादशर्णायै षोडशार्णायै त्रिबीजकायै
त्रिपुरायै त्रिपुरहरवल्लभायै कात्यायिन्यै योगिनीगणसेवितायै चामुण्डायै
मुण्डमालिन्यै भैरवसेवितायै भीतिहरायै भवहारिण्यै कल्याण्यै

कल्याणदायै नमस्ते नमस्ते ॥ ५॥

नमो नमः कामुकामदायै नमो नमो भक्तदयाघनायै ।
नमो नमः केवलकेवलायै नमो नमो मोहिनी मोहदायै ॥६॥
नमो नमः कारणकारणायै नमो नमः शान्तिरसान्वितायै ॥
नमो नमः मङ्गलमङ्लायै नमो नमो मङ्गलभूतिदायै ॥ ७॥
नमो नमः सद्गुणवैभवायै विशुद्धविज्ञानसुखप्रदायै ।
नमो नमः शोभनशोभितायै नमो नमः शक्तिसमावृतायै ॥ ८॥
नमः शिवायै शान्तायै नमो मङ्गलमूर्तये ।
सर्वसिद्धिप्रदायै ते रेणुकायै नमो नमः ॥ ९॥

ललितायै नमस्तुभ्यं पद्माअवत्यै नमो नमः ॥

हिमाचलसुतायै ते रेणुकायै नमो नमः ॥ १०॥

विष्णुवक्षःस्थलावासे शिववामाङ्कसंस्थिते ।
ब्रह्माण्यै ब्रह्ममात्रे ते रेणुकायै नमोऽस्तु ते ॥ ११॥

राममात्रे नमस्तुभ्यं जगदानन्दकारिणी ।
जमदग्निप्रियायै ते रेणुकायै नमो नमः ॥ १२॥

नमो भैरवरूपायै भीतिहन्त्र्यै नमो नमः ।
नमः परशुरामस्य जनन्यै ते नमो नमः ॥ १३॥

कमलायै नमस्तुभ्यं तुलजायै नमो नमः ।
षड्चक्रदेवतायै ते रेणुकायै नमो नमः ॥ १४॥

अहिल्यायै नमस्तुभ्यं कावेर्यै नमो नमः ।
सर्वार्थिपूजनीयायै ते रेणुकायै नमो नमः ॥ १५॥

नर्मदायै नमस्तुभ्यं मन्दोदर्यै नमो नमः ।
आद्रिसंस्थानायै ते रेणुकायै नमो नमः ॥ १६॥

त्वरितायै नमस्तुभ्यं मन्दाकिन्यै नमो नमः ॥

सर्वमन्त्राधिदेवतायै ते रेणुकायै नमो नमः ॥ १७॥

विशोकायै नमस्तुभ्यं कालशक्त्यै नमो नमः ।
मधुपानोद्धतायै ते रेणुकायै नमो नमः ॥ १८॥

तोतुलायै नमस्तुभ्यं नारायण्यै नमो नमः ।
प्रधानागुहरूपिण्यै  रेणुकायै नमो नमः ॥ १९॥

सिंहगायै नमस्तुभ्यं कृपासिद्ध्यै नमो नमः ।
दारिद्र्यवनदाहिन्ये रेणुकायै नमो नमः ॥ २०॥

स्तन्यदायै नमस्तुभ्यं विनाशघ्न्यै नमो नमः ।
मधुकैटकभहन्त्र्यै ते रेणुकायै नमो नमः ॥ २१॥

त्रिपुरायै नमस्तुभ्यं पुण्यकीर्त्यै नमो नमः ।
महिषासुरविनाशायै ते रेणुकायै नमो नमः ॥ २२॥

चेतनायै नमस्तुभ्यं वीरलक्ष्म्यै नमो नमः ।
कैलाशनिलयायै ते रेणुकायै नमो नमः ॥ २३॥

बगलायै नमस्तुभ्यं ब्रह्मशक्त्यै नमो नमः ।
कर्मफलप्रदायै ते रेणुकायै नमो नमः ॥ २४॥

शीतलायै नमस्तुभ्यं भद्रकाल्यै नमो नमः ।
शुम्भदर्पहरायै ते रेणुकायै नमो नमः ॥ २५॥

एलाम्बायै नमस्तुभ्यं महादेव्यै नमो नमः ।
पीताम्बरप्रभायै ते रेणुकायै नमो नमः ॥ २६॥

नमः त्रिगायै रुक्मायै नमो ते धर्मशक्तये ।
अज्ञानकल्पितायै ते रेणुकायै नमो नमः ॥ २७॥

कपर्दायै नमस्तुभ्यं कृपाशक्त्यै नमो नमः ।
वानप्रस्थाश्रमस्थायै रेणुकायै नमो नमः ॥ २८॥

विजयायै नमस्तुभ्यं ज्वालामुख्यै नमो नमः ।
महास्मृतिर्ज्योत्स्नायै रेणुकायै नमो नमः ॥ २९॥

नमः तृष्णायै धूम्रायै नमोते धर्मसिद्धये ।
अर्धमात्राक्षरायै ते रेणुकायै नमो नमः ॥ ३०॥

नमः श्रद्धायै वार्तायै नमो मेधशक्त्ये ।
मन्त्राधिदेवतायै ते रेणुकायै नमो नमः ॥ ३१॥

जयदायै नमस्तुभ्यं शूलेश्वर्यै नमो नमः ।

अलकापुरसंस्थानायै रेणुकायै नमो नमः ॥ ३२॥

नमः परायै ध्रौव्यायै नमः ते शेषशक्त्ये ।
ध्रुवमयी हृद्रूपायै रेणुकायै नमो नमः ॥ ३३॥

नमो नमः शक्तिसमन्वितायै नमो नमः तुष्टिवरप्रदायै ।
नमो नमः मण्डनमण्डितायै नमो नमो मञ्जुलमोक्षदायै ॥ ३४॥

श्रीशिव उवाच –
इत्येवं कथितं दिव्यं रेणुकाहृदयं परम्।
यः पठेत्सततं विद्वान् तस्य सिद्धिः पदे पदे॥ ३५॥

राजद्वारे श्मशाने च संकटे दुरतिक्रमे।
स्मरणाद्धृदयस्यास्य सर्वसिद्धिः प्रजायते ॥ ३६॥

दुर्लभं त्रिषु लोकेषु तस्य प्राप्तिर्भवेद्ध्रुवम् ।
वित्तार्थी वित्तमाप्नोति सर्वार्थी सर्वमाप्नुयात् ॥ ३७॥

॥ इत्यागमसारे शिवषण्मुखसंवादे आनन्दभैरवोक्तं
रेणुकाहृदयं सम्पूर्णम् ॥

॥ ॐ क्लीं बीजात्मिकार्पणमस्तु ॥

Encoded and proofread by DPD

.. AnandabhairavoktaM shrIreNukAhRidayam ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*